# ॥ श्री राघवेंद्र कवचम् ॥

कवचं राघवेंद्रस्य यतींद्रस्य महात्मनः |
वक्ष्यामि गुरुवर्यस्य वांछितार्थप्रदायकम् || १ ||

ऋषिरस्याप्पणाचार्यः छंदोऽनुष्टुप् प्रकीर्तितम् |
देवता श्रीराघवेंद्रगुरुरिष्टार्थसिद्धये || २ ||

अष्टोत्तरशतं जप्यं भक्तियुक्तेन चेतसा |
उद्यत्प्रद्योतनद्योतभर्मकूर्मासने स्थितम् || ३ ||

एद्यखद्योतनद्योतप्रतापं राममानसम् |
धृतकाषायवसनं तुलसीहारवक्षसम् || ४ ||

दोर्दंडविलसद्दंडकमंडलुविराजितम् |
अभय ज्ञानमुद्राक्षमालाशीलकरांबुजम् || ५ ||

योगींद्रवंद्यपादाब्जं राघवेंद्रगुरुं भजे |
शिरो रक्षतु मे नित्यं राघवेंद्रोऽखिलेष्टदः || ६ ||

पापाद्रिपाटने वज्रः केशान् रक्षतु मे सदा |
क्षमासुरगणाधीशो मुखं रक्षतु मे गुरुः || ७ ||

हरिसेवालब्धसर्वसंपत्कालं ममावतु |
देवस्वभावोऽवतु मे दृशौ तत्त प्रदर्शकः || ८ ||

इष्टप्रदाने कल्पद्रुः श्रोत्रे श्रुत्यर्थबोधकः |
भव्यस्वरूपो मे नासां जिह्वां मेऽवतु भव्यकृत् || ९ ||

आस्यं रक्षतु मे दुःखतूलसंघाग्निचर्यकः |
सुखधैर्यादिसुगुणो भ्रुवौ मम सदाऽवतु || १० ||

ओष्ठौ रक्षतु मे सर्वग्रहनिग्रहशक्तिमान् |
उपप्लवोदधेस्सेतुर्दंतान् रक्षतु मे सदा || ११ ||

निरस्तदोषो मे पातु कपोलौ सर्वपालकः |
निरवद्यमहावेषः कंठं मेऽवतु सर्वदा || १२ ||

कर्णमूले तु प्रत्यर्थिमूकत्वाकरवाङ मम |
बहुवादिजयी पातु हस्तौ सत्तत्त्ववादकृत् || १३ ||

करौ रक्षतु मे विद्वत्परिज्ञेयविशेषवान् |
वाग्वैखरीभव्यशेषजयी वक्षस्थलं मम || १४ ||

सतीसंतानसंपत्तिभक्ति ज्ञानादिवृद्धिकृत् |
स्तनौ रक्षतु मे नित्यं शरीरावद्यहानिकृत् || १५ ||

पुण्यवर्धनपादाब्जाभिषेकजलसंचयः |
नाभिं रक्षतु मे पार्श्वौ द्युनदीतुल्यसद्गुणः || १६ ||

पृष्टं रक्षतु मे नित्यं तापत्रयविनाशकृत् |
कटिं मे रक्षतु सदा वंध्यासत्पुत्रदायकः || १७ ||

जघनं मेऽवतु सदा व्यंगस्वंगसमृद्धिकृत् |
गुह्यं रक्षतु मे पापग्रहारिष्टविनाशकृत् || १८ ||

भक्ताघविध्वंसकरनिजमूर्तिप्रदर्शकः |
मूर्तिमान्पातु मे रोमं राघवेंद्रो जगद्गुरुः || १९ ||

सर्वतंत्रस्वतंत्रोऽसौ जानुनी मे सदावतु |
जंघे रक्षतु मे नित्यं श्रीमध्वमतवर्धनः || २० ||

विजयींद्रकराब्जोत्थसुधींद्रवरपुत्रकः |
गुल्फौ श्रीराघवेंद्रो मे यतिराट् सर्वदाऽवतु || २१ ||

पादौ रक्षतु मे सर्वभयहारी कृपानिधिः |
ज्ञानभक्तिसुपुत्रायुर्यशः श्रीपुण्यवर्धनः || २२ ||

करपादांगुलीः सर्वा ममावतु जगद्गुरुः |
प्रतिवादिजयस्वांतभेदचिह्नादरो गुरुः || २३ ||

नखानवतु मे सर्वान् सर्वशास्त्रविशारदः |
अपरोक्षीकृतश्रीशः प्राच्यां दिशि सदाऽवतु || २४ ||

स दक्षिणे चावतु मां समुपेक्षितभावजः |
अपेक्षितप्रदाता च प्रतीच्यामवतु प्रभुः || २५ ||

दयादाक्षिण्यवैराग्यवाक्पाटवमुखांकितः |
सदोदीच्यामवतु मां शापानुग्रहशक्तिमान् || २६ ||

निखिलेंद्रियदोषघ्नो महानुग्रहकृद्गुरुः |
अधश्चोर्ध्वं चावतु मामष्टाक्षरमनूदितम् || २७ ||

आत्मात्मीयाघराशिघ्नो मां रक्षतु विदिक्षु च |
चतुर्णां च पुमर्थानां दाता प्रातः सदाऽवतु || २८ ||

संगम्रेवतु मां नित्यं तत्त्ववित्सर्वसौख्यकृत् |
मध्याह्नेऽगम्यमहिमा मां रक्षतु महायशाः || २९ ||

मृतपोतप्राणदाता सायाह्ने मां सदाऽवतु |
वेदिस्थपुरुषोज्जीवी निशीथे पातु मां गुरुः || ३० ||

वह्निस्थमालिकोद्धर्ता वह्नितापात्सदाऽवतु |
समग्रटीकाव्याख्याता गुरुर्मे विषयेऽवतु || ३१ ||

कांतारेऽवतु मां नित्यं भाट्ट (भाष्य) संग्रहकृद्गुरुः |
सुधापरिमळोद्धर्ता सु (स्व)च्छंदस्तु सदाऽवतु || ३२ ||

राजचोरविषव्याधियादोवन्यमृगादिभिः |
अपस्मारापहर्ता नः शास्त्रवित्सर्वदाऽवतु || ३३ ||

गतौ सर्वत्र मां पातूपनिषदर्थकृद्गुरुः |
ऋग्व्याख्यानकृदाचार्यः स्थितौ रक्षतु मां सदा || ३४ ||

मंत्रालयनिवासी मां जाग्रत्काले सदाऽवतु |
न्यायमुक्तावलीकर्ता स्वप्ने रक्षतु मां सदा || ३५ ||

मां पातु चंद्रिकाव्याख्याकर्ता सुप्तौ हि तत्त कृत् |
सुतंत्रदीपिकाकर्ता मुक्तौ रक्षतु मां गुरुः || ३६ ||

गीतार्थसंग्रहकरस्सदा रक्षतु मां गुरुः |
श्रीमध्वमतदुग्धाब्धिचंद्रोऽवतु सदाऽनघः || ३७ ||

इति श्रीराघवेंद्रस्य कवचं पापनाशनम् |
सर्वव्याधिहरं सद्यः पावनं पुण्यवर्धनम् || ३८ ||

य इदं पठते नित्यं नियमेन समाहितः |
अदृष्टिः पूर्णदृष्टिः स्यादेडमूकोऽपि वाक्पतिः || ३९ ||

पूर्णायुः पूर्णसंपत्तिभक्ति ज्ञानाभिवृद्धिकृत् |
पीत्वा वारि नरो येन कवचेनाभिमंत्रितम् || ४० ||

जहाति कुक्षिगान् रोगान् गुरुवर्यप्रसादतः |
प्रदक्षिणनमस्कारान् गुरोर्वृंदावनस्य यः || ४१ ||

करोति परया भक्त्या तदेतत्कवचं पठन् |
पंगुः कूणिश्च पौगंडः पूर्णांगो जायते ध्रुवम् || ४२ ||

शेषाश्च कुष्ठपूर्वाश्च नश्यंत्यामयराशयः |
अष्टाक्षरेण मंत्रेण स्तोत्रेण कवचेन च || ४३ ||

वृंदावने सन्निहितमभिषिच्य यथाविधि |
यंत्रे मंत्राक्षराण्यष्टौ विलिख्यात्र प्रतिष्ठितम् || ४४ ||

षोडशैरुपचारैश्च संपूज्य त्रिजगद्गुरुम् |
अष्टोत्तरशताख्याभिरर्चयेत्कुसुमादिभिः || ४५ ||

फलैश्च विविधैरेव गुरोरर्चां प्रकुर्वतः |
नामश्रवणमात्रेण गुरुवर्यप्रसादतः || ४६ ||

भूतप्रेतपिशाचाद्याः विद्रवंति दिशो दश |
पठेदेतत्त्रिकं नित्यं गुरोर्वृंदावनांतिके || ४७ ||

दीपं संयोज्य विद्यावान् सभासु विजयी भवेत् |
राजचोरमहाव्याघ्रसर्पनक्रादिपीडनात् || ४८ ||

कवचस्य प्रभावेण भयं तस्य न जायते |
सोमसूर्योपरागादिकाले वृंदावनांतिके || ४९ ||

कवचादित्रिकं पुण्यमप्पणाचार्यदर्शितम् |
जपेद्यः स धनं पुत्रान् भार्यां च सुमनोरमाम् || ५० ||

ज्ञानं भक्तिं च वैराग्यं भुक्तिं मुक्तिं च शाश्वतीम् |
संप्राप्य मोदते नित्यं गुरुवर्यप्रसादतः || ५१ ||

|| इति श्रीमदप्पणाचार्यविरचितं श्रीराघवेंद्रकवचं संपूर्णम् ||